नं. ५०२६

अशौच निर्णय:

पत्र ८

धर्मशास्त्र

स्वप्नौचनिर्णयः

५०२६

तास्मिन् = २   चतुर्थपातेत स्रावसंज्ञा = १

॥ श्रीगणेशायनमः॥ श्रीरुद्रायनमः॥ पराशरः॥ आचतुर्थाद्भवेत्स्रावः पातः पं
चमषष्ठयोः॥ अत ऊर्ध्वं प्रसूतिः स्यादिति॥ तत्र स्रावे आद्यमासत्रये मातुस्त्रिरात्रमा
शौचं॥ उपरि आषष्ठमासं मासतुल्यसंख्यादिनमाशौचं॥ चतुर्थे चत्वारि पंचमे पंच॥ ष
ष्ठे षडित्यर्थः॥ सपिंडानां तु स्नानमात्रेण शुद्धिः स्रावे॥ पाते तु त्रिरात्रं॥ सप्तममास
प्रभृतिषु स्वजातेस्तु कर्दशाहादि॥ सपिंडानां मातुश्च॥ माधवीये॥ सूतिकाव्यतिरिक्ता
नां॥ सप्तमे सप्तरात्रं॥ अष्टमे अष्टरात्रं॥ नवमप्रभृतिषु दशरात्रमित्याहु॥ जन्माशौचम
ध्ये शिशुमरणे मृताशौचं॥ नास्त्येव॥ जनननिमित्तकमेवाशौचं॥ निष्प्राणनिर्गमनेप्येवं॥
नालच्छेदात्पूर्वं दिनम शिशुमरणे सपिंडानां दिनत्रयमेव सूतकं॥ नालच्छेदानंतरं मरणे तु सं
पूर्णं॥ दशाहाद्युपरि नामकरणात्पूर्वं शिशुमरणे खननमेव नातु दाहः कार्यः॥ ज्ञातीनां स
चैलस्नानात्सद्यः शुद्धिः नामकरणानंतरं दंतजननात्प्राक् मरणे तु दाहखननयोर्विकल्पः॥

ख १

नाले छेदिमेरे = ३

सपिंडानां

नत्रदाहेज्ञातीनामेकाहं॥अनुगमनंतुकृताकृतं॥खननेपक्षेतुसद्यःशुद्धिः॥दंतजननो
र्द्ध्वमापित्रिवर्षपर्यंतमकृतचूडस्यखननदहनयोर्विकल्पएव॥खननेएका
हमाशौचं॥दहनेत्रिरात्रं॥अत्रत्र्यूर्द्ध्वंषंतिमनुगमनंकृताकृतं॥पक्षानित्य॥कृत
चूडस्यातुत्रिवर्षादूर्द्ध्वंतुयावदुपनयनंकृतचौलस्याकृतचौलस्यवामरणेऽनुगम
नंदहनंत्रिरात्राशौचंचनियतमेव॥मातापित्रोस्तु अनुपनीतशिशुमरणेदहने
खननयोरविशेषेणत्रिरात्रं॥स्त्रीपुत्रमरणेतुविशेषः॥त्रिपुरुषपर्यंतज्ञातीनां
माचैलात्सद्यःशुचिः॥ततोवाग्दानादर्वाकूएकाहमाशौचं॥ततोविवाहाद
र्वाक्पतिपक्षेपितृपक्षेचत्र्यहं॥पित्रोस्तु अजातदंतासुकन्यासुएकाह
ततस्त्र्यहं॥संस्कृतास्वपिपितृगेहेमृतासुपित्रोस्त्र्यहमिति॥माधवः॥अन्ये

सपिंडः(?) विवाहिताकन्या

=आजन्मनस्तुचूडांतनपश्चात्कन्याविपद्यते।सद्यः
शौचंभवेत्तत्र सर्ववर्णेषुनित्यशः॥=२

त्रिवर्षपर्यंतं

सप्तमादूर्द्ध्वं

उपनीतनाम
नतोपवीतका
नउपनीतः
अनुपनीतः।५

:॥
=तत्तप
तांतरं२

२

2

तुग्रहांतरमरणे पित्रहमाहुः ॥ पितृव्यादीनां तु एकाहमेव ॥ पितुर्गेहे कन्या
याः प्रसवे पित्रोरेकाहः ॥ माधवस्तु ॥ पितुर्गेहे कन्यायाः प्रसवमरणयोः
पित्रोस्त्रिरात्रमेव ॥ पितृव्यादीनां त्वेकरात्रमित्याह ॥ द्वितीयस्य द्वादश ॥ वैश्य
स्य पंचदश ॥ शूद्रस्य मासः ॥ सच्छूद्रस्य पक्षः ॥ कूटस्थमारभ्य सप्त पुरुषाः स
पिंडाः ॥ ततः सप्तमे समानोदकाः ॥ तदुत्तरं गोत्रजा एव ॥ तत्र समानोदके उत्पन्ने
उपनीतमृते च त्रिरात्रं ॥ गोत्रजे तु स्नानाच्छुद्धिः ॥ तत्र सूतकाशौच दशाहाद्युपरि ज
नने ज्ञाते नास्त्येव ॥ तत्रापि पितुः स्नानमेव ॥ मृताशौचं तु दशाहाद्युपरि मास
त्रयात्पूर्वं मरणज्ञाने त्रिरात्रं ॥ ततस्त्वा षष्ठं पक्षिणी ॥ ततस्त्वा नवममासादहः ॥
ततः स्नानोदकं दानान्तं शुद्धिः ॥ आ वर्षं ॥ वर्षादूर्ध्वं तु आत्मवमात्रं ॥ इदं च स राम·

साहेन सपिंडस्य तु ऊर्ध्वं निषेध सूतके ॥ त्रिरात्रेण सकुल्यास्तु स्नानमात्रेण गोत्रजाः ॥ ॥ २

तेन रहस्यति । देशांतरं वदंके बहि योजनमाचतं ॥ चत्वारिंशद्वयं तेके त्रिंशद्देकेऽत्र पैव चैवस्थमनुप्पाहृ ॥ वाचोयत्र
वीछमवधायकः ॥ महानद्यंतरं यत्र तद्देशांतरमुच्यते ॥ देशनाम नदी भेदा निकटे पिमवि तुयत् । नतु देशांतरं श्रोक्तं

ने २ दि ५

वीविज्ञाश्वराद्यनुरोधेनोक्तं ॥ माधवमते तु ॥ त्रिपक्षादर्वाक् त्र्यहं ॥ देशांतरे तु
स्नानमेवेति विज्ञानेश्वरादयः ॥ माधवस्तु देशांतरे पि सपिंडमरणे त्र्यहं ॥ सद्यः शौ
चं तु समानोदकमरण विषयमित्याह ॥ दशाहाद्यवच्छिन्नो यः स्वाशौचकालस्त
न्मध्येऽधिती याद्दोदिवसे जननमरण योः श्रवणे तु श्रवशिष्टैरेव दिवसैः शुद्धिः ॥ प्र
त्यहं योजनद्वयं गच्छन् पुरुषः यत्र मृतस्य वार्तां आशौचकाले प्रापयितुं न शक्नोति
तित द्देशांतरं ॥ तथा च ॥ विप्रस्य दशाहः शौचिनः विंशतियोजने देशांतरं ॥ क्ष
त्रियस्य द्वादशाहाशौचिनश्चतुर्विंशति योजनेमित्यादि ॥ तथा एकादश पंचदश त्रिंश
शौच षुद्धिचतुष्टय योजन रूप देशांतराणि योज्यानि ॥ मातापितृमरणे तु विशे
षः ॥ पितरौ चेन्मृतौ स्यातां दूरस्थोपि हि पुत्रकः ॥ श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भ
वेत् ॥ ॥ मातुः सपत्न्यास्तु त्रिदिनं ॥ इदं च हीनवर्णे यमित्याहुः ॥ मातापितृमरणे दशाह

सोकणि = २

विभिद्यंते गिरि
स्वयमेव तु यं पु
ना = दे दृश्येते
त्यादि ॥ तेन निमि
षादिभिवधा
नामावेयत्र
सावातेदि
शातामतरे
नश्रूयते तद्दे
शांतरं = ६

पा. हं सूती
की भवेद् = २

मित्रपञ्चमस्य॥स्त्रीपुरुषयोः परस्परं चैवं॥सवर्णेति मृतसपत्नीषु चेतिस्मृत्य
र्थसारे॥किंच॥इति सगोत्राशौचप्रकरणे पित्रोरूपमे मूढकन्यायास्त्रिरात्रं॥इति
त्रि॥दौहित्रे॥सहाध्यायिनि॥बंधुत्रये शिष्ये।श्वशुरे श्वश्र्वां।मित्रे।भगिन्यां।सोणि
नेये।मातामह्यां॥पितृस्वसरि मातृस्वसरि।मातुले।मातुलान्यां।पक्षिणी।बंधुत्रयं
तु।आत्मपितृस्वसुः पुत्राः॥आत्ममातृस्वसुः सुताः॥आत्ममातुलपुत्राश्च विज्ञेया
आत्मबंधवाः॥१॥पितुः पितृस्वसुः पुत्राः पितुः मातृस्वसुः सुताः॥पितुर्मातुलपुत्रा
श्च विज्ञेयाः पितृबंधवाः॥२॥मातुः पितृस्वसुः पुत्राः मातुर्मातृस्वसुः सुताः॥मातुर्मातुल
श्च विज्ञेया मातृबांधवाः॥३॥इति॥पक्षिणीशब्दार्थः स्कं॰ दिवामरणे तदहः अंतरा
रात्रिपरे घुश्च॥रात्रौ मरणे तु सा रात्रिः॥अपरे घस्ररहोरात्रश्च तिहरद्दत्ते नोक्तः॥आगा
मिवर्त्तमानाहर्युक्तानां निशि पक्षिणी त्यमरकोशव्याख्यायां क्षीरस्वामिनाप्युक्तं॥प

३

त्वा विवपन्नौ ॥ पूर्वोत्तरदिवसौ ॥ तन्मध्यवर्तिनी रात्रिः पक्षिणी ॥ निशाद्वयमध्य
गो दिवसोप्येवमिति ॥ याज्ञवल्क्यस्तु ॥ गुर्वन्तेवास्यनूचानमातुलश्रोत्रियेषु
चैकैकरात्रमाह ॥ तथा ॥ अत्र सपिण्डस्यापि यज्ञे हेमरणेत ज्ञेऽहस्वामिन स्त्रिया रा
त्रमित्यङ्गिराः ॥ एकरात्रमिति विष्णुः ॥ तथा ॥ बृहस्पतिः ॥ अहं मातामहाचार्यश्रो
त्रियेष्वशुचिर्भवेत् ॥ प्रचेताः ॥ मृते स्वसा मातुलयोः श्वश्रूश्वशुरयो गुरौ ॥ मृतेष्वृत्वि
जि याज्ये च त्रिरात्रेण विशुध्यति ॥ वशिष्ठः ॥ संस्थिते पक्षिणीं रात्रिं दौहित्रे भ
गिनीसुते ॥ संस्कृते तु त्रिरात्रं स्यादिति ॥ विष्णुः ॥ आचार्यपत्नीपुत्रोपा
ध्यायमातुलश्वशुरश्वश्रूर्यासुसपिण्डसहाध्यायिशिष्येष्वतीतेष्वेकरात्रेणेत्यादि ॥ ए
तेषां च गुरुलघुकल्पनासंनिधिसंनिधिगुणवद्गुणवत्पक्षत्वेनापक्षत्वभेदेन
व्यवस्थेत्याहुः ॥ एतच्चाचार्यादिमरणे त्रिरात्रादिकमन्यस्मिन्दाहकत्वेति ॥ दाहकत्वे

प्राय॰ पापं विजानीयात् विति: तस्य विशेषो धिनं ।= ५

स्त॰ दशामेव ॥ देशाधिपतौ तु दिनमस्ते दिनं ॥ रात्रिमृते तु रात्रिः ॥ मानुषास्थिस्पर्शे स्ने
हबुधिपूर्वस्पर्शे त्रिदिनं ॥ विरसे तु दिनं ॥ अबुध्या तु सरसे स्पर्शे स्नानं ॥ विरसे त्वा
४ चमनं ॥ अमानुषास्थिस्पर्शे तु ॥ सस्नेहे स्नानं ॥ अशौचिनापदि बुधिपूर्वं
सकृद्भुक्ते यस्मिन्दिने भुक्तं ततःशिष्टहमाशौचं ॥ असकृद्बुधिः पूर्वं भुक्तेपि
एतदेवाशौचं ॥ प्रायश्चित्ते परं विशेषः ॥ अनापदि बुधिपूर्वं भोजने पि दिनमा
५ शौचं ॥ सजातीयस्य उत्कृष्टजातीयस्य वाऽनुगमने सचैलस्नानं घृतप्राशनं च ॥
॥ ब्राह्मणस्य क्षत्रियानुगमने त्वहोरात्रं ॥ हीनविपस्य वैश्यानुगमने पावं ॥
शूद्रानुगमने पहीणि ॥ ब्राह्मणस्य शूद्रानुगमने त्रिरात्रं ॥ पराशरः ॥ प्रेती
भूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः ॥ अनुगच्छेन्नीयमानं स त्रिरात्रेण शुध्यति
त्रिरात्रे तु ततस्तीर्णे ॥ नदीं गत्वा समुद्रगां ॥ प्राणायामशतं कृत्वा घृतं प्रा राम॰ ४

प्रेतीभूतं ममूहं धर्मार्थं ऽनाथस्य स्नात्वा निर्हरणे = २

स्यात्विशुध्यतीति ॥ धर्मार्थमनाथं ब्राह्मणं निर्हृत्य तु पदे पदे ऽश्वमेधफलं ॥ अथवा गोत्र नात्सद्यःशौचं ॥ स्नेहादिना तु शवं निर्हृत्य तदीयमन्नमश्नन् तद्गृहे एव वसति दशाहेन शुद्धिः ॥ तद्गृहवास मात्रे त्रिरात्रं ॥ यस्तु तदीयमन्नं भुङ्क्ते न वा तद्गृहे वसति तस्यैकाहं ॥ ब्रह्मचारिणः माता पितृ व्यतिरिक्त शवः निर्हरणे व्रत लोपः ॥ माता पितृ निर्हरणे पि आशौचं विना मन्त्रं ब्रह्मचारी नाश्नीयात्तैः सह न संवसेच्च ॥ सूतके वर्तमाने तु द्वितीयं सूतकं यदि ॥ पूर्वेणैव तु शुध्येत जाते जातं मृते मृतं ॥ मृतपातकयोगे तु या शुद्धिः सा निगद्यते ॥ मृतेन शुध्यते जातं न मृतं जातके न तु ॥ अन्यत्रापि ॥ शावेन शुध्यते सूतिर्न सूतिः शावशोधिनी ॥ यदा तु शौचावधेरल्पाऽधिक काल व्यापी द्वितीयमापतति ॥ यदा त्रिरात्रमध्ये दशाहं न तत्र पूर्वशेषेण शुद्धिर्नास्ति ॥ यदि तु पूर्वप्रवृत्ताशौचमुत्तराशौच कालादधिक कालं स्यात्तदा पूर्वेण

= पूर्वपञ्चमदिनेषु पूर्वेणैव तरं शुद्धिः तदनन्तरं तु न स्यात्

= १

कपं ब्राह्मणस्य दशदिनानि अघं प्राक् मृतेन शुध्यते जातं न मृतं जातके न तु

वोत्तरसुद्धिः॥तद्यथा॥गर्भपातनिमित्तषडहाशौचमध्ये यदि दशाहाशौचमापतयेत्॥तद्दाष
डहाशौचशेषेणैव दशाहाशौचशुद्धिः॥अत्र विशेष मार्हगौतमः॥रात्रिशेषेद्वाभ्यां॥प्रभा
तेतिसृभिरिति॥रात्रिमात्रशेषे पूर्वाशौचे यद्याशौचांतरं तर्हि पूर्वाशौचमासमानंतरं द्वाभ्यां
रत्रिभ्यां सुद्धिः॥तथा एव रात्रे पश्चिमयामेत्वाशौचांतरे तिसृभीरात्रिभिःशुद्धिर्नतु तच्छेषमा
त्रेणेति विज्ञानेश्वरः॥नवमे दिवसे पूर्णे यद्याशौचांतरं तदा पूर्वाशौचकालानंतरं द्वाभ्यां रा
त्रिभ्यां सुद्धिः॥सा रात्रिः परमे द्युश्चेत्यर्थः॥प्रभाते तिसृभिरिति॥अथ यद् दशाहाहो व्यतीते॥
अपतद्धः प्रभाते संगवे संगवयन्न्यदापतेत॥ततस्तिसृभी रात्रिभिरिति॥पित्राशौचमध्ये
मातरि मृतायां पूर्वाशौचसमाप्तावपि पक्षिणीमधिकाकुर्यात्॥मात्राशौचमध्ये पितृ
मरणे पित्राशौचं पूर्णमस्त्येव॥यदि तु पित्राशौचे रात्रिशेषे माता म्रियते तदा पक्षिणी
त्र्यह यो विकल्प इति केचित् त्र्यह एवेत्यन्ये॥अथाशौचनिषेधः॥न संस्कार्यं प्रपद्येतेति

राम
५

शास्त्रमुलंघ्य महानदंतराणादौ प्रवृत्तः सन् यो म्रियते तस्य दर्शाहाशौचादि न कार्यं सव
त्सरानंतरं नारायणबलिं सर्वमौर्ध्वदेहिकं कार्यमेव ॥ सर्पहतो सौवर्णनागं प्र तद्द्यागं प्र
दद्यात्कं कं ॥ प्रमाद्द मरणे चाशौचादिकमस्त्येव ।तथा चांगिराः ॥ यदि कश्चित्प्रमादेन
म्रियताग्न्युदकादिभिः तस्याशौचं विधातव्यं कर्तव्या चोदकक्रियेत ॥ बुद्धमरणे तु विशे
षमाह ॥ शातातपः ॥ वृधः शौचक्रियालुप्तः प्रत्याख्यातभिषक्क्रियः ॥ आत्मानं घातये
घस्तु भृग्वग्न्यनशनांबुभिः ॥ तस्य त्रिरात्रिमाशौचं द्वितीये त्वस्थिसंचयः ।तृतीये तू
दकं दत्वा चतुर्थे श्राद्धमाचरेत् ॥ ॥ इतीदं चाशौचमाहिताग्नेस्तु परमे संस्कार दिवस
प्रभृति कर्तव्यं अनाहिताग्नेस्तु मरणदिवसप्रभृति ॥ संचयनं तु प्रथमेऽह्नि इतरेषां पे हो
त्यादिना विहितमुभयोरपि संस्कारप्रभृत्येव आहिताग्नौ पितरि देशांतरमृते तत्पुत्रादीना
रे षादिना येन तान्त्वलमता तस्याशौचं

मासंस्कारोपक्रमाशौचं नास्ति ॥ अनाहिताग्नेस्तु विधिवद्दाहाभावे तदानीमाशौचग्रहणं त्रै
कालिकं ॥ तत्र गृहीताशौचानां संस्कारकाले पुनस्त्र्याहं ॥ अगृहीताशौचानां तु पूर्णं दशाहाद्ये
व ॥ पुत्राणां पत्न्यास्त्वियं व्यवस्था ॥ पत्नीसंस्कारे पत्युस्त्र्यहमेव ॥ सपत्नीनामपि त्र्यहमेव ॥ अगृहीताशौ
चानां तु त्रिरात्रं ॥ गृहीताशौचानां सपिण्डानां तु पुनराशौचं नास्त्येव ॥ अहिताग्नेस्तु प्रकृति
दाहे सपिण्डानां दशाहमेव ॥ इदं चाशौचं द्विविधं ॥ अस्पृश्यत्वप्रयोजकं ॥ कर्मानधिका
रत्वलक्षणं ॥ ॥ पुत्रे जाते पितुरास्नास्त्येव किंतु कर्मानधिकारितामात्रं ॥ सूतिकातु पु
त्रजनने तु विंशतिरात्रं कर्मानर्हा कन्याजनने तु मासं ॥ पुत्रजन्मदिवसे पितुर्दानादौ व
चनादधिकारः ॥ तथा च ॥ शंखलिखितौ ॥ कुमारप्रसवे नाभ्यामच्छिन्नायां दानप्र
तिग्रहादिषु दोषस्तद्दहरिति ॥ इति जन्मदिवसे देवतापूजायामपि प्रथमषष्ठदशमदिव
सेषु वचनादधिकारः ॥ मृताशौचे तु सर्वेषामस्पृश्यत्वमौत्सर्गिकं ॥ स्वस्वाशौचे विभा
रषि पातु जन्मादीनां च कर्मणेतारस्तत्पूर्णं ॥ निषेधं तत्र विशेषतः ॥ जन्मादीनां षोडशमासं तु णां षष्टिकास
[illegible] ॥ षष्टी निषेधे [illegible] शास्त्रादिसन्निधापनेनेत्यर्थः ॥ २

तत्रागर्भो धारणात् मासचतुष्टयान्मांतरे गर्भच्युतिः स्रावः पंचमषष्ठयोपातः सप्तमादौ
प्रसवः॰ स्रावे मातुस्त्रिरात्रं स्यात् सपिंडाशौचवर्जनं। पाते मातुर्यथामासं पित्रादीनां दिनत्रयं
स्रावे पितुः स्नानादेव शुद्धिः॰ स्नानमात्रमेव उक्तं कश्यपस्मरणेन तु। यथामासं॰ माससमसंख्या दिना
(नि॰ गर्भस्रावे मासतुल्या निशा शुद्धेस्तु कारणं॰ अत्र स्रावे पातने इदं गर्भस्रावाशौचं सर्ववर्णानां॥
नरं॰ गर्भस्रावे यथामासमचिरेणोत्तमे त्रयः॰ राजन्ये चतूरात्रं वैश्ये पंचाहमेव तु॰ अष्टाहेन तु शूद्रस्य
शुद्धिरेषा प्रकीर्तितेति वचनं॰ गुणवद्गुणवद्विषयत्वेनापदनापद्विषयत्वेन वा व्यवस्थापनीयं॰ जनने
नाशौचे सप्तमासप्रभृति दशाहादिकं यथावर्णमशौचं संपूर्णं कार्यं॰ जाते पुत्रे पितुः स्नानं सचैलं तु विधी
यते। माता शुद्ध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः

जन्मनि पितुः संस्पर्शात् ... स्वविभागादूर्ध्वं तु स्वशः ।

७ गादूर्ध्वं तु स्वशः ॥ यतिना ब्रह्मचारिणां च नाशौचं ॥ समावर्तनानंतरं प्राङ्उक्तानां सपिं
डानामुदकदानं कृत्वा त्रिरात्रमाशौचं कुर्यादेव ॥ पित्रादिमृत उदकानादिकं कुर्वन् ब्र
ह्मचारी तद्दिवाशौचं चरति ॥ पिक्रीतं श्रीयक्षितानाम शौचं नास्ति ॥ पूर्वं प्रवृत्ते यो
पनयनादिसंस्कारे यज्ञे देवताप्रतिष्ठारामाद्युत्सर्गादिषु पूर्वे शौचं नेमिति ॥ ॥
इति पदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसूरिसूनुनामभट्टोजिदीक्षितेन विरचित आशौच
निर्णयः समाप्तः ॥ ॥ शुभं भूयात् ॥ ॥ ॥ लिखितं वैशाखी पुष्करणास्वात्मार्थं
संवत् १७१४ चैत्र सुदि २ लिपीकृतं चंद्रभाणा ३ पकेण ॥ ॥ शुभं भूयात् ॥ छ ॥ ॥
एकोनद्विगतुरगतुरगभूवर्षे चैत्रे च पक्षे सिते

राम